अकृतसपिण्डीकरणेनापि श्राद्धं कुर्य्यादिति शास्त्रनिश्चयः। अतो वचनबलाददोषः इति तात्पर्य्यम्। अत्र तु प्रेतीभूतपितामहेन पितुः सपिण्डने पितामहस्यैकोद्दिष्टमेव।

"असपिण्डीकृतं प्रेतमेकोद्दिष्टेन तर्पयेत्॥"

इति प्रागुक्तजाबालवचनात्। एवमन्यत्रापि बोध्यम्। वृद्धप्रपितामहस्य प्रेतत्वे तेन सह न कार्य्यमिति तात्पर्य्यम्॥*॥ अत्र मातुः सपिण्डने श्वशुरार्य्यश्वशुरयोः पिण्डौ कुर्य्यात्सुतः। तथा च गार्ग्यः।

"पतिनैकेन कर्त्तव्यं सपिण्डीकरणं स्त्रियाः।
सा गता हि मृतैकत्वं कुर्य्यादन्तरयन् पितॄन्॥
श्वशुरस्याग्रतो यस्माच्छिरःप्रच्छादनक्रिया।
पुत्त्रैर्दर्भैश्च सा कार्य्या मातुरभ्युदयार्थिभिः॥"

अन्तरयन्तीत्यर्थे अन्तरयन्निति लिङ्गव्यत्ययेन पुंस्त्वमिति हलायुधः। परवचनं गोभिलश्राद्धसूत्रभाष्यकृतापि लिखितम्। अतएव प्रव्रजिते पतिते वा पितरि सृते न पितामह्यादिभिर्मातुः सपिण्डीकरणं किन्तु पितामह्यादिभिरेव।

"स्वेन भर्त्रा सहैवास्याः सपिण्डीकरणं स्त्रियाः
एकत्वं सा गता यस्माच्चरुमन्त्राहुतिव्रतैः।
तस्मिन् सति सुताः कुर्य्युः पितामह्या सहैव तु॥"

इत्यत्र तस्मिन् सतीति श्राद्धानर्हभर्त्तुरुपलक्षणम्। अतएव।

"तस्याश्चैव तु जीवन्त्यां तस्याः श्वश्वेति
निश्चयः।"

इति लघुहारितेन श्वश्रुजीवने तस्याः श्वश्वेत्युक्तं न तु श्वशुरेणेति क्वचिदप्युक्तम्॥*॥ एवं पितामह्यादिभिर्मातुः सपिण्डीकरणेऽपि सामर्थ्येन ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा इति मन्त्रो न पाठ्यः मन्त्रलिङ्गविरोधात्। अतएव आभ्युदयिके मातृपक्षे श्रीदत्तादिभिर्मन्त्रान्तरं लिखितं न तु ये चात्र त्वामिति। वस्तुतस्तु आभ्युदयिके छन्दोगानां मातृपक्ष एव नास्तीति वक्ष्यते। एवञ्च।

"अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्।
ये समाना इति द्वाभ्यां शेषं पूर्ववदाचरेत्॥"

एतत् सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपि। इति याज्ञवल्क्येन पार्व्वणैकोद्दिष्टविकृतीभूतपुंसपिण्डनातिदेशात् तद्विकृतीभूतस्त्रीसपिण्डनेऽपि ये समाना इति मन्त्रद्वयस्य पार्व्वणोक्तस्य ये चात्र त्वामिति मन्त्रस्य च लिङ्गार्थासमवेतत्वेऽपि प्रकृत्यर्थस्य समवेतार्थत्वात् पाठः।

"ततः प्रमातामहानामप्येवं श्राद्धं कुर्य्याद्विचक्षणः।
मन्त्रोहेन यथान्यायं शेषाणां मन्त्रवर्ज्जितम्॥"

इत्यनेन यच्छेषाणां मन्त्रवर्ज्जनमित्युक्तं तत् शुन्धन्तां पितरः शुन्धन्तां पितामहाः इत्यादि प्रकृत्यूहयोग्यमन्त्रवर्ज्जनपरमिति प्रागुक्तम्। मार्कण्डेयपुराणम्।

"सर्व्वाभावे स्त्रियः कुर्य्युः स्वभर्त्तॄणाममन्त्रकम्
तदभावे च नृपतिः कारयेत् स्वकुटुम्बवत्॥
स्त्रीणामप्येवमेवैतदेकोद्दिष्टमुदाहृतम्।
मृताहनि यथान्यायं नृणां यद्वदिहोदितम्॥"

स्त्रियोऽत्र असवर्णोढ़ा अपरिणीता वेति श्राद्धविवेकः। सवर्णोढ़ायाः पुत्त्रपौत्त्रप्रपौत्त्राभाव एव विधानात्। तथा शङ्खः।

"पितुः पुत्त्रेण कर्त्तव्या पिण्डदानोदकक्रिया।
तदभावे तु पत्नी स्यात्तदभावे सहोदरः॥"

स्त्रीणामिति तु सम्प्रदानपरम्। स्त्रीकर्त्तृकत्वस्य पूर्व्वार्द्धे एवोक्तत्वात्। एकमेवामन्त्रकमित्यर्थः। इति श्राद्धविवेकः॥ अत्र स्त्रिय इत्यस्यासवर्णोढ़ा अपरिणीतापरत्वव्याख्यानात् स्त्रीणां मन्त्रनिषेधोऽपि तत्सम्प्रदानकश्राद्ध एवावगम्यते। न तु स्त्रीसम्प्रदानकमात्रे। कल्पतरौ तु स्त्रीणामप्येवमिति याद्दशेन सम्बन्धेन पितृव्यत्वादिना पुरुषाणामेकादशाहादिश्राद्धं ताद्दशेन सम्बन्धेनैव स्त्रीणामेतत् कर्त्तव्यमिति। एतद्व्याख्याने स्त्रीसम्प्रदानकश्राद्धे सुतरां मन्त्राः पाठ्याः। याज्ञवल्क्येनापि समन्त्रकमेकोद्दिष्टं सपिण्डीकरणञ्चोक्ता एतत् सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपीत्यनेन स्त्रिया अपि तथैवोक्तम्।

"मातुः सपिण्डीकरणं पितामह्या सहोदितम्।
यथोक्तेनैव कल्पेन पुत्त्रिकाया न चेत् सुतः॥"

इति छन्दोगपरिशिष्टेनापि यथोक्तेनैव कल्पेन इत्यनेन मन्त्रादिकसर्व्वमतिदिष्टं व्यवहारोऽपि तथैति। अमन्त्रकं स्त्रीकर्त्तृकमन्त्रपाठरहितम् अमन्त्रा हि स्त्रियो मताः। इति बौधायनेन सामान्यतोऽभिधानात्। न तु ब्राह्मणकर्त्तृकमन्त्रपाठरहितम्। तथा च वराहपुराणम्।

"अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्ज्जितः।
अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते॥"

अत्रामन्त्रस्येति विशेषणस्य यावदमन्त्रव्यावर्त्तकत्वेन परिभाषारूपत्वान्न प्रेतश्राद्धमात्रविषयः न वा शूद्रकर्त्तृकश्राद्धमात्रविषयः। किन्तु स्त्रीकर्त्तृकश्राद्धमप्यस्य विषयः। व्यक्तं ब्राह्मे।

"स्त्रीभिश्चावरवर्णैश्च श्राद्धं विप्रानुशासनात्।
मन्त्रवद्विधिपूर्व्वन्तु वह्निपाकविवर्ज्जितम्॥"

विप्रानुशासनात् विप्रपाठनात्। मन्त्रवन्मन्त्रयुक्तम्। वह्निपाकविवर्ज्जितमित्यसवर्णस्त्रीकर्त्तृकश्राद्धपरम्। पतिकर्त्तृकश्राद्धेऽपि पत्न्याः पाकाधिकारदर्शनात्। तथा च छन्दोगपरिशिष्टम्।

"श्राकञ्च फाल्गुनाष्टम्यां स्वयं पत्न्यथवा पचेत्।"

पत्नीत्वञ्च सवर्णोढ़ायाः। ज्येष्ठा पत्नीति वचनात्। ज्यैष्ठ्यमाह मनुः।

"यदि स्वाश्च पराश्चैव विन्देरन् योषितो द्विजाः
तासां वर्णक्रमेणैव ज्यैष्ठ्यं पूजा च वेश्म च॥"

कुबेरोपाध्यायधृतम्।

"असंस्कृतप्रमीतानां पिता न श्राद्धमाचरेत्।
यदि स्नेहेन कुर्व्वीत सपिण्डीकरणं विना॥"

असंस्कृतप्रमीतानाम् अनुपनीतमृतानाम्। लघुहारीतः।

"पुत्त्रेणैव तु कर्त्तव्यं सपिण्डीकरणं स्त्रियाः।
पुरुषस्य पुनस्त्वन्ये भ्रातृपुत्त्रादयोऽपि ये॥"

आदिशब्दग्राह्यानाह स एव।

"भ्राता वा भ्रातृपुत्त्रो वा सपिण्डः शिष्य एव
वा।
सहपिण्डक्रियां कृत्वा कुर्य्यादभ्युदयं ततः॥"

भ्राता वा इति वा शब्दात् भ्रातृपेक्षया प्रधानत्वेन पूर्व्वाधिकारिणां दौहित्रान्तानां समुच्चयः अतएव सपिण्डत्वेनैव भ्रातृतत्पुत्त्रयोरधिकारसिद्धौ पृथगुपादानं प्राधान्यज्ञापनार्थम्॥*॥

"महागुरौ प्रेतीभूते वृद्धिकर्म्म न युज्यते॥"

इति शूलपाणिलिखितवचनेन।

"प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत्।
नापि दैवं न वा पैत्रं यावत् पूर्णो न वत्सरः॥"

इति देवीपुराणवचनेन च प्रेतीभूतमातापितृकस्य पितुः प्रेतीभूतमातापितृकस्य संस्कार्य्यस्य प्रेतीभूतमातापितृकायाः अनूढ़ायाः कन्यायाश्च वैदिककर्म्मकर्त्तृत्वकर्म्मत्वानर्हत्वेन तत्परीहाराय यदहर्व्वा वृद्धिरापद्येत इत्यनेन पूर्व्वदिने सपिण्डनं कृत्वा पित्रादिः परदिने अभ्युदयं नामकरणादिकं कुर्य्यात्। ऊढ़ायास्तु पतिरेको गुरुः स्त्रीणाम्। इति वचनोक्तैकपदेन पत्युरेव महागुरुत्वाभिधानात् तत्प्रेतत्वमात्रे तस्याः कर्म्मानधिकारः। एवञ्च पितृमात्रोर्म्महागुरुत्वव्यावृत्तेस्तयोर्म्मरणे ऊढ़ाया न कर्म्मानधिकारः अत्राभ्युदयसपिण्डनयोरानन्तर्य्यमात्रं क्त्वाप्रत्ययार्थः न त्वेककर्त्तृत्वमपि। अन्यथा सपिण्डनाधिकारिण्याः पत्न्याः सत्त्वे अभ्युदयाधिकारिणो भ्रातुः सपिण्डनाधिकारापत्तेः। यथा,=

"नानिष्ट्वा तु पितॄन् श्राद्धैः कर्म्म वैदिक-
मारभेत्॥"

इति शातातपवचने पितृकर्त्तृकवृद्धिश्राद्धानन्तरमेव पुत्त्रेण विवाहः क्रियते। न तु पुत्त्रेण श्राद्धान्तरं क्रियते॥*॥ अत्र पुरुषस्य पुनस्त्वन्ये इत्यनेन पुत्त्रवत् शिष्यान्तस्य सपिण्डने सामान्यतोऽधिकारप्रतिपादनात् अभ्युदयं विनापि पुरुषस्य सपिण्डनं प्रतीयते।

"सह पिण्डक्रियां कृत्वा कुर्य्यादभ्युदयं ततः।"

इति तु सपिण्डीकरणात् पूर्व्वमभ्युदयाभावार्थं न त्वभ्युदयसत्त्व एव सपिण्डीकरणार्थमिति॥*॥ यत्तु।

"यानि पञ्चदशाद्यानि अपुत्त्रस्येतराण्यपि।
एकस्यैव तु दातव्यमपुत्त्रायाश्च योषितः॥"

इति छन्दोगपरिशिष्टीयं सपिण्डीकरणेतरपञ्चदशश्राद्धविधायकं तच्छिष्यपर्य्यन्ताभावे पुरुषस्य बोध्यम्। इतराणि एकोद्दिष्टविधानेनैव यानि प्राप्तानि प्रत्याब्दिकश्राद्धानि तान्येव दातव्यं दातव्यानि इत्यर्थः। अपुत्त्रायाश्चेति चकारोऽनुक्तसमुच्चायकः पतिरहिताया इति समुच्चिनोति।

"अपुत्त्रायां मृतायान्तु पतिः कुर्य्यात् सपिण्ड-
ताम्।